# ॥ वाल्मीकि रामायण॥

## ३ अरण्यकाण्ड

### अध्याय ६

रामस्तु सहितो भ्रात्रा सीतया च परन्तपः ।
सुतीक्ष्णस्याश्रमपदं जगाम सह तैर्द्विजैः ॥१॥

स गत्वा दूरमध्वानं नदीस्तीर्त्वा बहूदकाः ।
ददर्श विपुलं शैलं महामेघमिवोन्नतम् ॥२॥

ततस्तदिक्ष्वाकुवरौ सततं विविधैर्द्रुमैः ।
काननं तौ विविशतुः सीतया सह राघवौ ॥३॥

प्रविष्टस्तु वनं घोरं बहुपुष्पफलद्रुमम् ।
ददर्शाश्रममेकान्ते चीरमालापरिष्कृतम् ॥४॥

तत्र तापसमासीनं मलपङ्कजटाधरम् ।
रामः सुतीक्ष्णं विधिवत्तपोवृद्धमभाषत ॥५॥

रामोऽहमस्मि भगवन्भवन्तं द्रष्टुमागतः ।
तन्माभिवद धर्मज्ञ महर्षे सत्यविक्रम ॥६॥

स निरीक्ष्य ततो वीरं रामं धर्मभृतां वरम् ।
समाश्लिष्य च बाहुभ्यामिदं वचनमब्रवीत् ॥७॥

स्वागतं खलु ते वीर राम धर्मभृतां वर ।
आश्रमोऽयं त्वयाक्रान्तः सनाथ इव साम्प्रतम् ॥८॥

प्रतीक्षमाणस्त्वामेव नारोहेऽहं महायशः ।
देवलोकमितो वीर देहं त्यक्त्वा महीतले ॥९॥

चित्रकूटमुपादाय राज्यभ्रष्टोऽसि मे श्रुतः ।
इहोपयातः काकुत्स्थो देवराजः शतक्रतुः ।
सर्वाँल्लोकाञ्जितानाह मम पुण्येन कर्मणा ॥१०॥

तेषु देवर्षिजुष्टेषु जितेषु तपसा मया ।
मत्प्रसादात्सभार्यस्त्वं विहरस्व सलक्ष्मणः ॥११॥

तमुग्रतपसं दीप्तं महर्षिं सत्यवादिनम् ।
प्रत्युवाचात्मवान्रामो ब्रह्माणमिव वासवः ॥१२॥

अहमेवाहरिष्यामि स्वयं लोकान्महामुने ।
आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥१३॥

भवान्सर्वत्र कुशलः सर्वभूतहिते रतः ।
आख्यातः शरभङ्गेन गौतमेन महात्मना ॥१४॥

एवमुक्तस्तु रामेण महर्षिर्लोकविश्रुतः ।
अब्रवीन्मधुरं वाक्यं हर्षेण महताप्लुतः ॥१५॥

अयमेवाश्रमो राम गुणवान्रम्यताम् इह ।
ऋषिसङ्घानुचरितः सदा मूलफलैर्युतः ॥१६॥

इममाश्रममागम्य मृगसङ्घा महायशाः ।
अटित्वा प्रतिगच्छन्ति लोभयित्वाकुतोभयाः ॥१७॥

तच्छ्रुत्वा वचनं तस्य महर्षेर्लक्ष्मणाग्रजः ।
उवाच वचनं धीरो विकृष्य सशरं धनुः ॥१८॥

तानहं सुमहाभाग मृगसङ्घान्समागतान् ।
हन्यां निशितधारेण शरेणाशनिवर्चसा ॥१९॥

भवांस्तत्राभिषज्येत किं स्यात्कृच्छ्रतरं ततः ।
एतस्मिन्नाश्रमे वासं चिरं तु न समर्थये ॥२०॥

तमेवमुक्त्वा वरदं रामः सन्ध्यामुपागमत् ।
अन्वास्य पश्चिमां सन्ध्यां तत्र वासमकल्पयत् ॥२१॥

ततः शुभं तापसभोज्यमन्नं
स्वयं सुतीक्ष्णः पुरुषर्षभाभ्याम् ।
ताभ्यां सुसत्कृत्य ददौ महात्मा
सन्ध्यानिवृत्तौ रजनीं समीक्ष्य ॥२२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com